॥ अभ्यासपाठः ४३ ॥

२१ तमे शतके भारते किं किं भवेत् इति उदाहरणं दृष्ट्वा वदतु -

उदाहरणः -
वस्तूनां मूल्याम् अधिकं भवति ।
वस्तूनां मूल्यम् अधिकं भवेत् ।

१ भूमौ जलम् एव न भवति ।

२ जपान् देशः आक्रमणं करोति ।

३ पेत्रोल् समाप्तं भवति ।

४ इदानीन्तनः प्रधानमन्त्री स्वर्गं गच्छति ।

५ कुतुब्मीनार् भवनं पतति ।

६ अरविन्दः महाकाव्यं लिखति ।

७ विदिशा न्यायशास्त्रं पठति ।

८ बहु कष्टानि भवन्ति ।

९ जनाः आहारार्थं तृणमपि खादन्ति ।

१० सर्वे परस्परं युद्धां कुर्वन्ति ।

११ केऽपि हितवचनानि न शृण्वन्ति ।

१२ धनिकाः धनं न ददति ।

१३ भिक्षुकाः भिक्षाटनं न त्यजन्ति ।

१४ मन्त्रिणः जनान् चन्द्रलोकं प्रेषयन्ति ।

१५ केऽपि शीघ्रं न उत्तिष्ठन्ति ।

१६ सर्वे सर्वदा आसन्दे उपविशन्ति ।

१७ जनाः पूर्वजान् न स्मरन्ति ।

१८ ते देवान् न पूजयन्ति ।

१९ ते सर्वान् अपि निन्दन्ति ।

२० ते जलाभावकारणतः वस्त्राणि न प्रक्षालयन्ति ।

२१ सोउरशक्त्या वाहनानि चलन्ति ।

२२ पुष्पाणि न विकसन्ति ।

२३ शिल्याः गुरुं पाठयन्ति ।

२४ ते सर्वदा क्रीडन्ति ।

२५ चोराः सर्वं चोरयन्ति ।

उदाहरणं दृष्ट्वा पुरुषपरिवर्तनं करोतु -

उदाहरणः -
भवान् पाठं पठेत् ।
अहं पाठं पठेयम् ।

१ भवान् चित्रं लिखेत् ।

२ भवती स्वप्नं पश्येत् ।

३ भवान् कविः भवेत् ।

४ भवती चिन्तनं कुर्यात् ।

५ अहं धनं प्रेशयेयम् ।

६ अहं संस्कृत गीतं गायेयम् ।

७ भवती प्रश्नं पृच्छेत् ।

८ भवान् सुखम् अनुभवेत् ।

९ भवान् देह्लीनगरं गच्छेत् ।

१० भवती संस्कृतभाषां विस्मरेत् ।

उदाहरणं दृष्ट्वा वचनपरिवर्तनं करोतु -

उदाहरणः -
भवान् शालं गच्छेत् ।
भवन्तः शालां गच्छेयुः ।

१ कः सैनिकः युद्धं कुर्यात्
२ एषा नाटकं पश्येत् ।

३ सः सर्वाणि वस्तूनि नयेत् ।

४ एषः रामायणं पठेत् ।

५ भवती दूरतः जलम् आनयेत् ।

६ भवान् सुन्दराणि चित्राणि लिखेत् ।

७ का रङ्गवल्ली लिखेत् ।

८ अहं अभ्यासं त्यजेयम् ।

९ अहं फलरसं पिबेयम् ।

१० अहं ल्ःअड्वाद उत्तिष्ठेयम्

११ अहं आयुर्वेदः जानीयाम् ।

१२ अहं सत्यमेव वदेयम् ।

१३ अहम् उत्तमानि चित्राणि पश्येयम् ।

१४ अहं सर्वमपि स्मरेयम् ।

१५ अहं सद्विचारं चिन्तयेयम् ।

Encoded by Sarada Kalisetty
skaliset@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated October 16, 2000